# Somjyoti Student Corners



## छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य "संस्कृतसमाहोत्सवः-२०१९" इति कार्यक्रमे विविधस्पर्धासु छात्रप्रातिभवैभवम्

(१) "स्वर्णायिते संस्कृतभूमिरेषा"

संन्द्रदेवेन्द्रविनोदवर्यैर्दीपैश्शुकागुरुज्ञानकोषैः।
पौराणिकैर्रविलसंस्कृतज्ञैः स्वर्णायिते संस्कृतभूमिरेषा॥

(२) "शर्करा तिक्ततां गता"

चन्द्रखण्डकरत्वञ्च सूर्यः शीतत्वमेव च।
आकाशः नीरभत्वञ्च सागरः शुष्कतां गतः॥
अनुष्णतां गतश्चाग्निर्वायुश्चागन्धतां गतः।
कविसृष्टौ पुनस्त्वेषा शर्करा तिक्ततां गता॥

रचिता – देरासरी ऋषभः जीतेन्द्रभाई,
आचार्य-द्वितीयवर्षम्, अनुस्नातकविभागः,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्



२७-०९-२०१९ दिनाङ्के श्रीगोपालकृष्णट्रस्ट-जूनागढद्वारा बिलखा-ग्रामस्थ-आनन्दाश्रमे वक्तृत्वस्पर्धा समायोजिता आसीत्। अस्यां स्पर्धायां श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयस्य द्वौ छात्रौ प्रथम-द्वितीयपुरस्काराभ्यां सभाजितौ अभवताम्।

(१) दवे नील जगदीशभाई – प्रथमपुरस्कारः
(२) गोहिल अविरत प्रवीणभाई – द्वितीयपुरस्कारः





गुजरातसर्वकारेण आयोजितस्य खेलमहाकुम्भस्य तालुकास्तरीय-कबड्डी-क्रीडायां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः प्रथमस्थानं प्राप्तवन्तः। १६-०९-२०१९ दिनाङ्के सेण्ट-मेरी-हाय-स्कूल इत्यत्र आयोजितायामस्यां स्पर्धायाम् इमे छात्राः भागमगृह्णन् – राजगोर जयदीपः, जोषी प्रकाशः, अकोटी शुभम्, पण्ड्या यशवन्तः, त्रिपाठी ऋषिः, दवे रोहितः, सियाणी रमेशः, जोषी स्मितः, रादडिया रविः, राज्यगुरुः जयदीपः, सियाणी जयेशः च।



श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य (१) चौधरी सङ्गीताबेन गोविन्दभाई (२) गामित शीलाबेन शिवाजीभाई इति द्वाभ्यां छात्राभ्यां २०१९ तमे वर्षे भारतसर्वकारस्य जनजातीयकार्यमन्त्रालयस्य "National Fellowship & Scholarship for Higher Education of ST Students" इति छात्रवृत्तिः सम्प्राप्ता।





Somnath Sanskrit University Library

## आदित्यबिरलापब्लिकविद्यालये समायोजिते संस्कृतदिवसकार्यक्रमे छात्राणां विशेषप्रदर्शनम्

वेरावलनगरस्थेन आदित्यबिरलापब्लिकविद्यालयेन स्वपरिसरे ०७-०८-२०१९ तमे दिनाङ्के संस्कृतदिवसः समायोजितः आसीत् यत्र मुख्यातिथित्वेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य उपस्थितिः आसीत्। अस्य संस्कृतदिवसोत्सवकार्यक्रमे आदित्यबिरलापब्लिक-विद्यालयस्य प्राचार्या श्रीमती नीपा रेजी वर्या, संस्कृताध्यापकः श्रीदिनेशशर्मा, विद्यालयस्य इतरे अध्यापकाः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरण-प्राध्यापकः डॉ. दीपेश कतिरा च उपस्थिताः आसन्। अस्मिन् कार्यक्रमे विद्यालयस्य छात्रैः संस्कृतदिवसं निमित्तीकृत्य संस्कृतगीतानि अगीयन्त, संस्कृतभाषणानि अक्रियन्त, शास्त्रीयनृत्यञ्च अक्रियत। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रौ दवे नीलः, राज्यगुरुः जयदीपश्च अस्मिन्नवसरे विशिष्टमेकं संस्कृतनाटकं प्रस्तुतवन्तौ। संस्कृतगिरा प्रस्तुतम् नाटकमिदम् अत्र उपस्थितेभ्यः सर्वेभ्यः भृशं प्रशंसितम्।



आदित्यबिरलापब्लिकविद्यालयस्य संस्कृतसमारोहे उपस्थितः कुलपतिः प्रो. गोपबन्धुमिश्रः अन्ये च

# छात्रप्रातिभवैभवम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रयोदशे युवमहोत्सवे "**कन्यका पाल्यतां कन्यका पाठ्यताम्**" इति विषये समस्यापूर्तिस्पर्धायां विजेतृभिश्छात्रैः रचितानि पद्यानि—

## (१) - कन्यारक्षणाष्टकम्

विश्वसम्पोषिका विश्वसंवर्धिका शक्तिरूपा शिवा विश्वमूलाऽमला।
देवरूपा दयामूर्तिरूपा सदा कन्यका पाल्यतां कन्यका पाठ्यताम् ॥१॥
साम्प्रते तान्त्रिके जागृते शैक्षिके सर्वतन्त्रे स्वतन्त्रे नभश्चुम्बिते।
वैश्विके त्यक्तकुप्रथशिक्षायुगे कन्यका पाल्यतां कन्यका पाठ्यताम् ॥२॥
कल्पना चावला दीपिका साधना पी.वी.सिन्धुः स्मृतिर्मेरिकोमेन्दिरा।
भारतं दृश्यतां भारतं गृह्यतां कन्यका पाल्यतां कन्यका पाठ्यताम् ॥३॥
कार्यसम्मन्त्रिणी या स्वयंसेविका भोजने मातृका स्वप्नसम्भा मता।
धर्मसञ्चारिणी गेहसञ्चालिका कन्यका पाल्यतां कन्यका पाठ्यताम् ॥४॥
मानवश्चन्द्रगो भौमभूमिं गतः, व्योमयानैः सूर्यवृत्तं जितम्।
तादृशे संयुगे हे जना! जाग्रतु कन्यका पाल्यतां कन्यका पाठ्यताम् ॥५॥
सर्वकारोऽपि 'बेटी बचाओ' सदा योजनां लक्षवित्तैः सुसञ्चाल्यते।
मोदिवाक्यं शिवं सखा आगम्यतां कन्यका पाल्यतां कन्यका पाठ्यताम् ॥६॥
पौरुषे प्राकृते भेदबोधो वृथा द्वे समाने सदा वेदवाक्यैः स्फुटम्।
तत् 'समानी व आकूति'-रेतद्यथा कन्यका पाल्यतां कन्यका पाठ्यताम् ॥७॥
सुहृदागम्यतां भेदधीस्त्यज्यतां कन्यका सर्वतन्त्रेति सम्मन्यताम्।
उच्यतां गम्यतां नादतो गम्यतां कन्यका पाल्यतां कन्यका पाठ्यताम् ॥८॥

*(त्रयोदशे युवमहोत्सवे प्रथमस्थानेनसभाजिता इयं रचना)*

रचयिता -
**भट्टः सौरभकुमार जगदीशभाई,**
श्रीपरत्नुसंस्कृतमहाविद्यालयः,
सोला (अहमदाबाद)



## (२) - कन्यका पाल्यतां कन्यका पाठ्यताम्

यद्वृन्दावनं यत्पदाम्भोरुहपातसंपावितं कारितं धारितम्।
देवता यापरा शारदैवापरा कन्यका पाल्यतां कन्यका पाठ्यताम् ॥१॥
कृत्स्नभूवीतलं या यया पालितं शारदारूपया भूरिशः पाठितम्।
हन्त! तत्रापि निर्मोकमापद्यते कन्यका पाल्यतां कन्यका पाठ्यताम् ॥२॥
यन्मुखान्निर्गता काकली शोभना सञ्चरन्ती गृहे पुण्यमातन्वती।
हर्षसंपूरितं या करोत्यन्तरं कन्यका पाल्यतां कन्यका पाठ्यताम् ॥३॥
हे पितः! स्थीयतां साकमेवेति मे क्रीडितं यस्य ते सुता कथं क्रीडति।
इत्यमस्याः वचो मन्कृते जीवनं कन्यका पाल्यतां कन्यका पाठ्यताम् ॥४॥
प्राणदात्री च या मातृरूपात्मका प्राणधर्त्री च या तत्स्वरूपा पुनः।
हन्त! तस्या दशा कीदृशी जायते? कन्यका पाल्यतां कन्यका पाठ्यताम् ॥५॥
कन्यका काङ्क्षतां कन्यका जायतां कन्यकाशोभितं भूतलं नम्यताम्।
कन्यकाशक्तिसंजृम्भितं भूतले कन्यका पाल्यतां कन्यका पाठ्यताम् ॥६॥
भो जनाः किं भवद्भिः सुधा काङ्क्ष्यते? गेहके स्वर्गसम्पन्मुदा भाव्यते?
तर्हि मे सद्वचः श्रूयतां तथ्यजं कन्यका पाल्यतां कन्यका पाठ्यताम् ॥७॥
हन्त! यस्या दशामीदृशीं वीक्ष्य रे लेखदक्षापि मे लेखिनी कम्पते।
नाधिकं लिख्यते निम्नमाप्नेह्यते 'कन्यका पाल्यतां कन्यका पाठ्यताम्' ॥८॥
धन्यधन्यं गृहं यद्गृहे कन्यका पुण्यपुण्यं जगत् कन्यकाशोभितम्।
मान्यमानो जनः कन्यकापत्यवान् कन्यका पाल्यतां कन्यका पाठ्यताम् ॥९॥

*(त्रयोदशे युवमहोत्सवे द्वितीयस्थानेन सभाजिता इयं रचना)*

रचयिता –
**ठाकरः राजेशकुमार गोविन्दभाई,**
श्रीभागवतविद्यापीठट्रस्ट-शिक्षाशास्त्रि-
महाविद्यालयः, सोला (अहमदाबाद)



## (३) कन्यका पाल्यतां कन्यका पाठ्यताम्

(विषयमण्डनप्रस्तुतिः)

यो महावेदनातः प्रसूतः सुतः पोषितः दुष्करैः कर्मभिः पाठितः। आत्मनोऽद्यास्ति भार्यानिदेशे रतः कन्यका पाल्यतां कन्यका पाठ्यताम् ॥१॥
वित्तवारिस्तौ वैद्यकः कारितो लोकपीडारतोऽयं हि वित्तस्पृहः। रुग्णमाता सकृत्तेन नो दृश्यते कन्यका पाल्यतां कन्यका पाठ्यताम् ॥२॥
सेवते पूर्वमेषा पितुः मन्दिरं सेवते सा च पत्युः पुनः मन्दिरम्। तां द्वयोः पितृपत्यालयोः देवतां कन्यका पाल्यतां कन्यका पाठ्यताम् ॥३॥

(प्रातविषयखण्डनम्)

या हि पित्रा सदा लालिता पालिता पूरिता सर्वदुष्परणीयाः स्पृहाः।
प्रेममार्गां त्यजत्यद्य पित्रोर्गृहं कन्यका पाल्यतां कन्यका पाठ्यताम् ॥१॥
या च मात्रा हि बाल्यात् सदा शिक्षिता रक्षिता दूषणात् भूषणैर्मण्डिता।
सा सखीमध्यगा मातृतो लज्जते कन्यका पाल्यतां कन्यका पाठ्यताम् ॥२॥

*(त्रयोदशे युवमहोत्सवे तृतीयस्थानेन सभाजिता इयं रचना)*



रचयिता - **जोशी महदेव प्रवीणचन्द्रः**, श्रीभागवतविद्यापीठट्रस्टसञ्चालितशिक्षाशास्त्रिमहाविद्यालयः, सोला (अहमदाबाद)